NADI VIENANAM

R S V L
12698

L 3B
N86
12-698

नाड़ी विज्ञानम् ।

श्रीयुतभुवनचन्द्र वसाक महोदयस्य प्रार्थनया

कविराज श्रीयुक्तद्वारकानाथ भट्टाचार्य्य कविरत्नेन

संगृहीतम् ।

A. 216.

——[०॥०]——

A 216

८ नं निमतला घाट ष्ट्रीटस्थ

श्रीयुक्त भुवनचन्द्र वसाकेन प्रकाशिता ।

——(Ξ)——

कलिकातानगर्य्याम्

८ नं निमतला घाट ष्ट्रीटस्थ

संवाद ज्ञानरत्नाकर यन्त्रे श्रीभुवनचन्द्र वसाकेन

मुद्रितम् ।

इंराजी १८८६ साल ।

नाड़ी विज्ञानम्।

महेश मसकृत् ध्यात्वा द्वारकानाथ शर्म्मणा।
क्रियते नाड़ी विज्ञानं नाड़ी बोधाय यत्नतः॥

रोगमादौ परीक्षेत ततोऽनन्तर मौषधम्।
ततः कर्म्म भिषक् पश्चात् ज्ञानपूर्व्वं समाचरेत्।
रोगावस्थां ततो नाड़ीं भेषजं पथ्य मेवच।
देशं कालञ्च पात्रञ्च यो जानाति स वैद्यराट्॥
नाड़ी जिह्वार्त्तवादीनां वैशिष्ठात् प्रतिभायुषी।
निदानाद्यविशेषेण विदूरोगञ्च धीमतः॥
आदौ सर्व्वेषु रोगेषु नाड़ी जिह्वाग्र नेत्रकम्।
मूत्रार्त्तवं परीक्षेत पश्चाद्वैद्यश्चिकित्सयेत्॥
नाड़ी जिह्वार्त्तवादीनां लक्षणं यो न विन्दति।
मारयत्याशु जन्तूनां स वैद्यो नच शोभनः॥
नाड़ी ज्ञानं विना यो वै चिकित्सां कुरुते भिषक्।
स नैव लभते लक्ष्मीं नच धर्म्मं नवै यशः॥

नाड़ी लक्षण मज्ञात्वा निदानग्रन्थवाक्यतः ।
चिकित्सा मारभेद्यस्तु तस्य सिद्धेरनित्यता ॥
अङ्गानां नाड़िकानान्तु यच्च रोग निवर्हनम् ।
तदेव काकतालीयं तत्तदेव घुणाक्षरम् ॥
निदानपञ्चकादीनां लक्षणं वैद्य सत्तमः ।
नाड़ीन्तु सम्बलीकृत्य चिकित्सा माचरेत्तुवै ॥
नाड्या मूलस्य जिह्वायाः कुरु पूर्व्वं परीक्षणम् ।
पश्चाच्च भेषजं देयं वैद्य सद्यः सुखावहम् ॥
कियच्चिह्न मपि ज्ञात्वा चिकित्सा दुःखदा भवेत् ।
तेनैवच समासेन यदुक्तं तदिहोच्यते ॥
नाना शास्त्र विहीनानां वैद्याना मल्प मेधसाम् ।
सुखं विज्ञातु मप्येतत् नाड़ीजिह्वादीनार्त्तवम् ॥
तत्रादा वुच्यते नाड़ी जिह्वाद्यार्त्तव सम्भवा ।
परीक्षा सुगमाकृष्य ग्रन्थादेव यथामतिः ॥
जले स्थलेऽन्तरीक्षे वा प्रसिद्धा यस्य या गतिः ।
सैवोपमान मत्र स्यात् प्रसिद्धगुणयोगतः ॥
नाड़ी परिचय द्वार मधुना नैव दृश्यते ।
तेन धन्वै र्यदुक्तं यत् तत् समाधेय सुत्तमैः ॥
न शास्त्र पठनाद्वापि गम्बदध्वयनादपि ।
स्पर्शनादि योगाभ्यासं विना नाड़ी विवेक भाक् ॥

नाड़ीगति मिदं ज्ञातुं योगाभ्यासवदेकतः।
शक्यते नान्यथाचान्यै र्दृहस्पति समैरपि॥

——०॥०——

अथ नाड़ी चक्रः

——०——

R S V L 12698

सार्द्ध त्रिकोट्यो नाड्यो
स्थूलाः सूक्ष्माश्च देहिनाम्।
नाभिकन्द निबद्धा स्ता
स्तिर्य्यगूर्द्ध मधः स्थिताः॥
द्वासप्तति सहस्रन्तु तासां स्थूलाः प्रकीर्त्तिताः।
देहे धमन्योधन्यास्ताः पञ्चेन्द्रियगुणावहाः॥
महाशक्ति कुण्डलिनी नाभिस्था हंसरूपिणी।
दश चोर्द्वगता नाड्यो दशचाधोगता स्तथा॥
द्वे द्वे तिर्य्यगता नाड्यो चतुर्व्विंशतिरित्यतः।
ताभ्यः सूक्ष्मतमानाड्यः शरीरेष्वपि पोषिकाः॥
शतानि तत्र जायन्ते संख्यया सप्तभिः सह।
प्राधान्याद्दशनाड्यस्तु दशवायु प्रवाहिकाः।
नामानि नाड़िकानान्तु बातादीनां शृणुष्वमे।
इड़ा पिङ्गला सुसुम्ना गान्धारी हस्ति जिह्विका।
पुषा चालम्बुषा कुहु शंखिनी क्रान्दिनी तथा॥

तासान्तु सूक्ष्मशुषिराणि शतानि सप्त,
व्याप्तानि वैरसदृदन्तरसं वहद्भिः।
आधाय्यतें वपुरिदं हि नृणाममीषा,
मम्भः स्रवद्भिरिव सिन्धुशतैः समुद्रः॥
आपादतः प्रततगात्र मशेष शेष-
मामस्तकादपिच चर्म्म चयेन नद्धम्।
एतच्चटदङ्गदृव नाभि पुरः स्थितेन,
कायं नृणामिह शिराशत सप्तकेन॥
यथावीणागता तन्त्री सर्व्वानागान् प्रकाशते।
तथा हस्तगता नाडी सर्व्वान् रोगान् प्रभाषते॥
शतानि सप्तनाड्यस्तु कथिता याः शरीरिणाम्।
सम्भूयाङ्गुष्ठ मूलेन शिरामेका मधिष्ठिता॥
सप्तशतानां मध्ये चतुरधिका विंशतिः स्फुटाः।
तासामेका परीक्षणीया दक्षिणकरचरण विन्यस्ताः।

तदुक्तम्

तिर्य्यक् कूर्म्मो देहिनां नाभिदेशे,
वामे वक्त्रं तस्य पुच्छञ्च याम्ये।
ऊर्द्ध भागे हस्तपादौच वामौ,
तस्याधस्तात् संस्थितौ दक्षिणौतौ॥
सुसुम्ना शम्भु लिलया शम्भुर्हं सस्वरूपकः।
मध्येनाड़ी सुसुम्ना लितयगुणमयी॥

वक्त्रे नाड़ीद्वयन्तस्य पुच्छे नाड़ीद्वयन्तथा।
पञ्च पञ्च करेपादे वाम दक्षिण भागयोः॥
स्त्रीना मूर्द्ध मुखः कूर्म्मः पुंसां पुनरधोमुखः।
अतः कूर्म्म व्यतिक्रान्तात् सर्व्ववैष व्यतिक्रमः॥
लक्ष्यते दक्षिणे पुंसां याच नाड़ी विचक्षणैः।
कूर्म्म भेदेन वामानां वामे चैवावलोक्यते॥
वामभागे स्त्रियो योज्या नाड़ी पुंसान्तु दक्षिणे-
एषक्रम विधि र्ज्ञेयः सर्व्वदेहेषु देहिनाम्॥

अपरञ्च

पुंसोदक्षिण हस्तस्य स्त्रियो वाम करस्य च।
अङ्गुष्ठ मूलगां नाड़ीं परीक्षेत भिषग्वरः॥

अन्यच्च

स्त्रीनां वाम करे नाड़ी पुरुषाणाञ्च दक्षिणे।
परीक्षेत भिषक् पश्चात् धृत्वा धृत्वा विमुच्यच।
स्त्रीपुंसो श्चिह्न भेदेन नाड़ी पश्येद्विचक्षणः।
स्त्रीचिह्ने स्त्रीक्लीवं विद्यात्
पुं चिह्ने पुंनपुंसकम्॥ [१]

---

(१) नपुंसकस्यतु स्त्रीपुरुषयोरन्यतराकार प्रकटता मपेक्ष्य परीक्षा कार्य्या। साम्यन्तु नस्यादेव। कृत्रिमस्यतु प्रकृतिस्थता मात्रम्॥

सर्व्वत्रैवा ङ्गुष्ठ मूलगां नाड़ीं परीक्षेत ।

यत उक्तं

करस्याङ्गुष्ठ मूले या धमनी जीव साक्षिणी ।
तच्चेष्टया सुखं दुःखं ज्ञेयं कायस्य पण्डितैः ॥
यद्यस्ति नाड़ो सर्व्वत्र शरीरे धातु वाहिनी
तथा प्यङ्गुष्ठ मूलस्था करस्य सर्व्वशोभिनी
यस्य गति वशा द्विद्यात् सुखं दुःखञ्च देहिनाम् ॥
विलसति मनिरन्ध्रे ग्रन्थि रङ्गुष्ठ मूले ।
तद् धरण मिताभिस्त्र्यङ्गुलिभिर्णिपीड्य ॥
स्फुरणमसक्रदेषा नाड़िकायाः परीक्षा ।
पद मनु घुटिका धोऽङ्गुष्ठ मूलें तथैव ।
अंगकोष्ठ प्रवाहस्य मध्यपार्श्व समन्विता ।
जीवनाड़ी च सा प्रोक्ता नन्दिना तत्त्ववेदिना ।
अङ्गुष्ठ मूले करयोः पादयो गुल्फदेशतः ।
कपाल पार्श्वयोः षड़भ्यो नाड़ीभ्यो व्याधिनिर्णयः ॥
नाभ्योष्ठ पाणि पात् कण्ठनासोपान्तेषु याश्चिताः ।
तासु प्राणस्य सञ्चारं प्रयत्नेन विभावयेत् ॥
वातं पित्तं कफं द्वन्द्वं सन्निपात न्तथैवच ।
साध्यासाध्य विवेकञ्च सर्व्वं नाड़ी प्रकाशयेत् ।
आगन्तुकं ज्वरं तृष्णामायासं मैथुनं क्लमम् ।
भयं शोकञ्च कोपञ्च कण्ठ नाड़ीविनि र्दिशेत्

मरणं जीवनं कामं कण्ठ रोगं शिरोरुजाम्
श्रवणानिलजान् रोगान् नासा नाड़ी प्रकाशयेत्
पाणिप्रात् कण्ठ नासाच्चि कर्ण जिह्वान्त मेढ्गाः।
वाम दक्षिणतो लक्ष्याः षोड़श प्राण बोधकाः॥

परीक्षा करण माह।

गुरुतोऽत्र प्रयत्नेन वैद्येन शुभमिच्छता।
ज्येष्ठे नाङ्गुष्ठ मूलेन नाड़ी पुच्छं परीक्षयेत्॥
नाड़ीं वायु प्रवाहेन शास्त्रं दृष्ट्वाच बुद्धिमान्।
गुरूपदेशं संस्मृत्य परीक्षेत मुहुर्मुहुः॥

प्रदर्शयें होष निजस्वरूपम्,
व्यस्तं समस्तं युगलो क्षतञ्च।
मूकस्य मुग्धस्य विमोहितस्य,
दीप प्रभावाइव जीव नाडी॥
सव्येन साचि धृति [२] कूर्पर भाग भाजा
पीड्याथ दक्षिण कराङ्गुलिका त्रयेन।
अङ्गुष्ठ मूल मधि पश्चिम भाग मध्ये
नाड़ी प्रभञ्जन गतिं सततं परीक्षेत्।

---

(२) रोग धृतेति पाठान्तरं। साचिधृतेति पाठः प्राचीन-सम्प्रदाय सिद्धस्तेन तिर्य्यक् करे धारण मुपपद्यते।
मध्य धृति अङ्गुलिद्वय मित स्थाने।

हस्तयोश्च प्रकोष्ठान्ते मनिबन्धेऽङ्गुलिद्वयम् ।
पादयो र्गोड़िका स्थानं गुल्फस्याधोऽङ्गुलि द्वयम् ॥
कण्ठमूले ऽङ्गुलिद्वन्द्वं नासायामङ्गुलिद्वयम् ।
एवमप्यङ्गुलि द्वन्द्वमग्रतः कर्ण रन्ध्रयोः ॥

अन्यच्च ।

निक निश यव एक स्तत् प्रमाणाङ्गुलिस्था-
स्तदुभय मितसङ्ख्येव नाड़ी प्रचारः ।
नभवति यदि तस्मिन् गेहिनी गेहमध्ये
कथमिह गृहमेधी तत्र जीव स्तदा स्यात्

सतत मिति सुस्थदशाया मपि ।

तदुक्तं ।

भावी रोगाव बोधाय सुस्था नाड़ी परीक्षणम्

अन्यत्रापि

स्पर्शणादिभिरभ्यासान्नाड़ीज्ञो जायते भिषक् ।
तस्मात् परास्पृशे न्नाड़ीं सुस्थाना मपिदेहिनां
स्पर्शनात् पीड़नाद्घातात् वेदनान्मर्दनादपि ।
तासु जीवस्य सञ्चारं प्रयत्नेन निरूपयेत्

परीक्षाकालमाह ।

प्रातः कृत समाचारः कृताचार परिग्रहम् ।
सुखासीनः सुखासीनं परीक्षार्थ मुपाचरेत् ॥
स्थिरचित्तः प्रसन्नात्मा मनसाच विशारदः ।
स्पृशेदङ्गुलिभिर्नाड़ीं जानीया द्दक्षिणेकरे ॥

12098

त्यक्त मूत्र पुरीषस्य सुखासीनस्य रोगिनः ।
न्यस्त जानु करस्यापि नाड़ी सम्यक् प्रबुध्यते ॥
ईषद्विनामित करं वितताङ्गुलीयम्
बाहु प्रसार्य रहिते परि पीड़नेन ।
अङ्गुष्ठ मूल परि पश्चिम भागमध्ये
नाड़ीं प्रभात समये प्रथमं परीक्षेत् ॥
वारत्रयं परीक्षेत धृत्वा धृत्वा विमुच्य च ।
विमृश्य बुद्धया बुद्धा रोग व्यक्तिं विनिर्दिशेत् ॥

निषिद्ध काल माह ।

तैलाभ्यङ्गे प्रसुप्ते च तथा च भोजनान्तरे ।
न तथा ज्ञायते नाड़ी यथा दुर्गतमा नदी ॥
सद्यः स्नातस्य भुक्तस्य क्षुत्तृष्णातप सेविनः ।
व्यायाम क्लान्त देहस्य सम्यङ् नाड़ी नबुध्यते ॥
पीत मद्य ज्वल मनो मल मूत्रादि वेगयुक् ।
नाड़ी ज्ञाने समर्थः स्या न लुब्ध क्रुद्ध कामुकाः ॥

स्वस्थानाड्या नवगतेनास्वास्थ्यवगन्तुं नशक्यते ।

अतः सुस्थताज्ञानमाह ।

मूलता गमन प्रायः स्वस्था स्वास्थ्यमयी शिरा ।
वातपित्तादिदोषेण नाड़ी नाना गतिर्ज्ञेत् ॥

तथा

प्रातः स्निग्धमयी नाड़ी मध्याह्ने तूष्णता न्विता ।

सायाह्ने धावमाना च चिराद्रोग विवर्जिता ॥

तथाच

सुव्यक्तता निर्म्मलत्वं स्वस्थान स्थिति रेवच ।
अमन्दत्व मचाञ्चल्यं सर्व्वासां शुभ लक्षणम् ॥

नाड़ी ज्ञानेनायुर्ज्ञानमाह ।

वाम नाड़ी दीर्घ रेखा बाऊ मूलेच स्पन्दते ।
जीवेत् पञ्चशतं वर्षं नात्र कार्य्या विचारणा ॥
दीर्घाकारा वाम नाड़ी कर्ण मूलेच स्पन्दते ।
जीवेत् पञ्चशतं सार्द्धं धनिको धार्म्मिको भवेत् ॥
वामनाड़ी खल्प रेखा हनुमूलेच स्पन्दते ।
पञ्चवर्षाधिकञ्चैव जीवनं नात्रसंशयः ॥

क्षुद् भोजनयोर्ज्ञान माह ।

सुखितस्य स्थिरा ज्ञेया चपला क्षुधितस्य च ।

अपरञ्च

चपला क्षुधितस्य स्यात्तृप्तस्य वहति स्थिरा ॥

प्रकारान्तरञ्च ।

सुखिनस्तु स्थिरा ज्ञेया तथा बलवती मता ।

प्रसङ्गाद्भक्ष्यज्ञान माह ।

पुष्टिस्तैल गुड़ाहारे मांसेच लगुड़ा क्षतिः ।
क्षीरेच स्निग्धिता वेगा मधुरै र्भेकवद्गतिः ॥

रम्भा गुड़ वटाहारे रूक्ष शुष्कादि भोजने।
वात पित्तार्त्त रूपेण नाड़ी भवति निश्चला॥

प्रकारान्तरञ्च।

चिपिटैर्भृष्ट द्रव्यैश्च नाड़ी मन्द वहाभवेत्।
कुष्माण्डै र्मूलकै श्चैव मन्दमन्दाच नाड़िका॥
मांसात् स्थिरवहा नाड़ी दुग्धात् शीता बलीयसी।
गुड़ैः क्षीरैश्च पिष्टैश्च स्थिरा मन्द वहा भवेत्॥
शाकैः कदलकैश्चैव रक्त पूर्णाच नाड़िका।
द्रवेतिकठिना नाड़ी कोमला कठिनाशने॥
द्रवकठिन मिश्रेतु कोमला कठिनापि च।
उपवासाज्जवेत् क्षीणा तथाच द्रुतवाहिनी॥
सम्भोगान्नाड़िका क्षीणा ज्ञेया द्रुतगतिस्तथा।
उष्णत्वं विषमा वेगा ज्वरिणां दधिभोजनात्॥
कामात् क्रोधात् वेग वहाच्छीणा चिन्ताभय प्लुता।
भाव क्षीणगति र्नाडी ज्ञातव्या वैद्यसत्तमैः॥

भावः अभिलाषाद्यवस्था, तया
क्षीण गतिः क्षुण्णतया ज्ञायमाना॥

अथ रसज्ञानम्।

मधुरे वर्हिगमना तिक्ते स्याद् भूलता गतिः।
अम्ले कोष्णा प्लवगतिः कटुके भृङ्ग सन्निभा॥

कषाये कठिनाम्लाना लवणे सबला द्रुता ।
एवं द्विचतुर्योगे नाना धर्म्मवती शिरा ॥
कटुकैर्लोङ्ग वेगाच लावकस्य गतिं वहेत् ।
क्षीरे भेक समा वेगा चटकस्य गतिं दिशेत् ॥
अम्लैश्च मधुराम्लैश्च नाड़ी शीता विशेषतः ॥
साद्रम्ल लवणा वायुं कषाय स्वादुतिक्तकाः ।
जयन्ति पित्तं श्लेष्माणं कषाय कटुतिक्तकाः ।
मिश्रगत्याच युग्मेन लक्ष्ये दुपदेशतः ॥

अथवातादिस्वभावक्रममाह ।

आदौ च वहते वातो मध्ये पित्तं तथैव च ।
अन्ते च वहते श्लेष्मा नाड़िका त्रय लक्षणम् ॥
स्फुटं विकाशते नाड़ी ज्ञातव्या सा चिकित्सकैः ।
न हि वातं शिराः काश्चि न्न पित्तं केवलं तथा ।
श्लेष्माणं वा वहन्ते ता अतः सर्व्व वहाः स्मृताः ॥
वायु र्यदानाभिकायां स्वगत्या परिपूरितः ।
श्लेष्मा पित्तं त्यजेत् किञ्चित् केवलं वातमादिशेत् ॥

---

(१) आदौ चवहते पित्तं मध्येश्लेष्मा तथैव च ।
अन्ते प्रभञ्जनो ज्ञेयः सर्व्वशास्त्र विशारदैः ॥
(२) आदौ च वहते श्लेष्मा मध्ये पित्तं तथैव च ।
अन्ते प्रभञ्जनो ज्ञेयः सर्व्वशास्त्र विशारदैः ॥
अयं क्रमोपि केनचित् क्वचित् पाठः ।

अन्यच्च—

प्रदेशिन्यां यदा वायुः स्वगत्या परिपूरितः ।
श्लेष्ममार्गं स्पृशेत् किञ्चित् केवलं वातमादिशेत् ॥
तर्ज्जन्याञ्च यदा पित्तं स्वगत्या परिपूरितम् ।
कफवातौ स्पृशेत् किञ्चित् केवलं पित्तमादिशेत् ॥
मध्यमायां प्रगन्नाचेत् कफः स्वगति पूरितः ।
वात पित्तं स्पृशेत् किञ्चित् केवलं कफमादिशेत् ॥

वातादीनां क्रमेण गति माह ।

वातात् वक्रगता नाड़ी चपला पित्तवाहिनी ।
स्थिरा श्लेष्मवती ज्ञेया मिश्र लिङ्गाच मिश्रिता ॥

उक्त वातादि वक्रता सामान्यस्य क्रमेण विशेषमाह

चलत्युरग जलौका वक्रगा मारुतेन ।
प्रकट करट भेका प्लुत्यगा पित्तकोपात्,
अतिशिथिल मरालो कुक्कुटानि प्रयाता ।
भवति कफ विरुद्धा सा त्रिधा जीवनाड़ी ।

अन्यच्च ।

वातार्त्ते भुजगाकारा पित्तार्त्ते मण्डूक प्लवा ।
श्लेष्म पारावत प्राया नाड़ी यास्यति देहिनाम् ॥
सर्पजलौकादिगतिं वदन्ति विबुधाः प्रभञ्जनेन ।
नाड़ीं पित्तेन काक लावक
भेकादि गतिं विदूः सुधियः ॥

राजहंसमयूराणां पारावत कपोतयोः ।
कुक्कुटादि गतिं धत्ते धमनी कफ संश्रिता ॥

अन्यच्च ।

वातेन नाड़ी स्फुरणं जलौका
भुजङ्गवद्वृश्चिक वच्च तिर्य्यक् ।
पित्तेन मण्डूक कुलिङ्ग लाव-
गति प्रतीतिं कुरुतेऽथ नाड़ी ॥
भुक्तस्य वान्तस्य च मेदुरस्य
निद्रारतस्यापि तथा रिरंसोः ।
कफाकुलस्यातिसुखेरतस्य
स्थौल्यं दधाना शिथिलं प्रयाति ॥

अपरञ्च ।

वातेन नाड़ी करवक्रफल्गु
व्याली जलौका प्रतिमा प्रयाति ।
विश्लेषणै र्वातभवैः समस्तै
र्भिषग् वरो निश्चितयेदर्थम् ॥
पित्तजापि धमनी वहेत् द्रुतं,
काक दर्दुरक लावकोपमम् ।
रोगराजमखिलं वदेत्सुतम्
पित्तदोष जनितै र्भिषग्वरः ॥
श्लेष्मना वहति नाड़िका स्थिरा

सभेक कुक्कुट कपोतवत् खलु।
रोग रूपमखिलं वदेत्तदा
श्लेष्म दोषभव लक्षणैः सदा॥
द्वन्द्वजस्यापि क्रमेण भेद माह।

तत्र वातपित्ते।

वातनाड़ी प्रगल्भा चेत् वहेत् पित्त प्रसंयुता।
कफस्तु संस्पृशेत् किञ्चित् वातपित्तं तदुच्यते॥
वातपित्त परिदूषिता सा,
सर्पवत्तदनु भेकवद्व्रजेत्।
तत्र रोग मुभयो र्वहेद्भुजा,
लक्षणैरिह विचक्षणो भिषक्॥
नाड़ीं मुञ्जर्भेकगतिं मुञ्जः सर्पगतिं तथा।
वातपित्त समुद्भूतां प्रवदन्ति महाधियः॥

वातश्लेष्मणि।

वात नाड़ी यदा पूर्णा श्लेष्मना सुप्रतिष्ठिता।
पित्तस्थाने वहेत् किञ्चित् श्लेष्मवातं विनिर्दिशेत्॥
कफ वात युता नाड़ी सर्पहंस गतिं व्रजेत्।
व्यक्ता हंसेन चाट्टत्ता रोग लक्षणत स्त्रयोः॥
ईषद्व्यक्ता स्तब्धमन्दा स्यान्नाड़ी श्लेष्मवातजा।
भुजगादि गतिं स्थूलां राजहंस गतिं तथा।
वातश्लेष्म समुद्भूतां प्रवदन्ति महाधियः॥

पित्तश्लेष्मणि ।

पित्त नाड़ीं यदा त्युग्रां श्लेष्मना परिपूरिताम् ।
किञ्चित् प्रभञ्जन गतां पित्तश्लेष्मानमादिशेत् ॥
मण्डूकादि गतिं नाड़ी सयूरादि गतिं तथा ।
पित्तश्लेष्म समुद्भूतां प्रवदन्ति मनिषिणः ॥

पित्तयुक्त कफ नाड़िका,
वहेत् काक भेकगमनानु कारिणी ।
पित्तयुक्त कफलक्षणै र्गदं,
वात प्रकृति निश्चयो भवेत् ॥

अपरञ्च

सूक्ष्मा शीता स्थिरा नाड़ी पित्तश्लेष्म समुद्भवा ।
तरलाचञ्चला स्थूला कठिना वातपित्तजा ॥

तथा त्रिदोषजे ।

सर्व्वलिङ्ग समायुक्ता सर्व्वजा परिकीर्त्तिता ।
उरगादि लावादि हंसादीनाञ्च विभ्रतीगमनं ॥
वातादीनां समं धमनी सम्बन्ध माधत्ते ।
लावतित्तिरवर्त्तिक गमनं सन्निपाततः ।
कदाचिन्मन्द गमना कदाचिच्छीघ्रगा भवेत् ।
त्रिदोष प्रभवे रोगे विज्ञेया सा भिषग्वरैः ॥

अन्यच्च ।

अत्युग्रा वहते वायुः कफेन परि पूरितः ।
नष्टे पित्तेच नाड्यांवै सन्निपातं विनिर्द्दिशेत् ॥

वातपित्तकफैः पूर्णा मुक्तः स्वगति संस्थिताः।
एक कालवहा नाड्यः सन्निपातं विनिर्द्दिशेत्॥
अत्युग्राच स्थिता चान्याऽपरे हंसाववासिनी।
याति सूक्ष्माच तरला तामसाध्यां प्रचक्षते॥
काष्ठ कीट पतङ्गानां समान गमना शिरा।
सन्निपात सदा रोगो वक्तव्य स्तत्विचक्षणैः॥
कदाचि न्मन्द गमना कदाचि द्वेग वाहिनी।
त्रिदोष कोपतो ज्ञेया हन्ति स्वस्थान विच्युता॥

अथ व्याधिविशेषे नाड़ी विशेष लक्षणं

तत्र ज्वर पूर्व्वरूपे।

अङ्ग ग्रहेण नाड़ीनां जायन्ते मन्थरा स्रवाः॥
स्रव प्रबलतां याति ज्वरदाहाभिभूतये॥
सान्निपातिकरूपेण भवन्ति सर्व्व वेदनाः।

ज्वररूप माह।

ज्वर वेगेच धमनो सोष्णा वेगवती भवेत्
स्थूलाच कठिना शीघ्रा स्पन्दते तीव्र मामजे।
निरन्तरं खरं रूक्षं मन्द मन्दाति वातलम्
सूक्ष्माच सवला दीर्घा शीघ्रा पित्तज्वरे भवेत्।

अन्यत्रच।

ज्वरेच वक्रं धावति ज्वरेच मारुत स्रवे।
रमणान्ते निशि प्रात स्तृष्णा दीप शिखाइव॥

तत्रापि विशेषः ।

सौम्या सूक्ष्मा स्थिरा मन्दा नाड़ी सहज वातजा
स्थूलाच कठिना शीघ्रा स्पन्दते तीव्र मारुते ॥
द्रुताच सबला दीर्घा शीघ्रा पित्तज्वरे भवेत् ।
शीघ्र माहननं नाड्याः कठिन्याञ्चलते तथा ।

द्वन्द्वज माह ।

चञ्चला तरला स्थूला कठिना वातपित्तजा ।
दृष्यच्च दृश्यते तूष्णा मन्दा स्यात् श्लेष्मवातजा ।
निरन्तरं खरं रूक्षं मन्दश्लेष्मातिवातला ॥
रूक्षवात भवेत्तस्य नाड़ी च पिण्ड सन्निभा ।
सूक्ष्मा शीघ्रा स्थिरा नाड़ी पित्त श्लेष्म समुद्भवा ॥

आगन्तुक ज्वरे ।

भूत ज्वरे भेक द्रुवातिवेगा ।
धावन्ति नाड्या हि यथाब्धि गामाः ॥

तथा

ऐकाह्निकेन कच न प्रदूरे ।
क्षणान्न गामा विषम ज्वरेण ।
द्वितीयके वाथ तृतीय तूर्ये
गच्छन्ति तस्मा भ्रमिवत् क्रमेण ॥

अन्यत्रापि ।

उष्णा वेगधरा नाड़ी ज्वर कोपे प्रजायते ।

उद्वेग क्रोध कामेषु भय चिन्ता श्रमेषुच ॥
व्यायामे क्रमणे चैव चिन्तया भय शोकतः।
नाना प्रकार गमनं शिरा गच्छति विज्वरे ॥
काम क्रोधोद्वेगवहा छिन्ना चिन्ता भयाप्लुता।
मन्दाग्नेः क्षीणधातोश्च नाड़ी मन्दतरा भवेत् ॥
मध्यकरे वहेन्नाड़ी यदि सन्तापिता ध्रुवम्।
तदा नूनं मनुष्यस्य रुधिरैः पूरितामलाः ॥
अश्रक् पूर्णा भवेत् कोष्णा सामा गुर्व्वी गरीयसी।
लघ्वी भवति दीप्ताग्नेस्तथा वलवती मता।
ज्वरेच वमने नाड़ी क्षीणाङ्गा मन्दगामिनी।
ज्वरे कामार्त्त रूपेण भवन्ति विकलाः शिराः ॥

प्रसङ्गाज्ज्वरिणः कुपथ्यादिज्ञान माह।

उष्णत्वं विषमा वेगा ज्वरिणां दधि भोजनात्।
अग्न्यग्नित्वादसुस्थत्वे भवन्ति तापिताः शिराः ॥
काञ्जिकया ज्वराक्रान्ते जायन्ते मन्थरा गतिः।

अजीर्णे।

मन्दाजीर्णेन निरतं सकफं परिकीर्त्तितम्।
नाड़ीतन्तु समा मन्दा शीतला श्लेष्म कोपतः ॥
मन्दाग्नेः शीतता याति गतिर्हंसाकृति स्तथा।

अथाती सार नाड़ी लक्षणं।

अतीसारेच मन्दा स्यात् ग्रीष्मकाले जौलकोवत्

ग्रहणी रोग नाड़ी लक्षणं ।

पादेच हंस सदृशी करेमण्डुक संप्लवा ।
तस्याग्ने र्मन्दता देहे उदरे ग्रहणी गदः ॥

तथाच ।

भेदेन शान्ता ग्रहणी गदेन ।
निर्वीर्य्य रूपा त्वती सार भेदे ॥

अर्शोरोग नाड़ी लक्षणं ।

अर्शोरोगे स्थिरा मन्दा क्वचिद्वक्रा क्वचिन्मृदुः ।

अथाजीर्ण रोग नाड़ी लक्षणं

अजीर्णेन भवेन्नाड़ी कठिना परितोजड़ा ।
प्रसन्नातु द्रुता शुद्धा त्वरिता च प्रवर्त्तते ॥

अत्रविशेषः ।

पक्वाजीर्णे पुष्टि क्षीणे मन्दं मन्दं वहेत्तु या ।

अग्निमान्द्य धातुक्षय ज्ञान माह ।

मन्दाग्नेः क्षीण धातोश्च नाड़ी मन्दतरा भवेत् ॥

अन्यच्च ।

क्षीण धातौच मन्देऽग्नौ नाड़ी क्षीणतमा भवेत् ॥

अन्येतु ।

आमा श्ये पुष्टि विवर्जनेन ।
भवन्ति नाड़्यो भुजगादि वृत्ता ।

आहार मन्दादुपवासतोवा।
तथैव नाड्यो भुजग प्रमाणाः॥

विलम्बिका रोग नाड़ी लक्षणं।

विलम्बिकायां प्लवगा कदाचि-
दामातीसारे प्रथुला जड़ा च।

विसूचिका रोग नाड़ी लक्षणं।

विसूचिकाभिभूतेच भवन्ति भेकवत् क्रमः।

तथान्यत्र।

विसूच्यां दृश्यतेनैव नैव स्थानं विमुञ्चति।

कृमिरोगे।

कृमि रोगे भवत्येव नाना धर्म्मवती शिरा।

पाण्डुरोगे।

पाण्डौतु केवलं नाड़ी मुज्जराख्यायतेस्थिरा।
पाण्डौतु केवलं तन्वी कृशा त्वष्टं प्रचारिणी॥

रक्तपित्त रोगे।

रक्तपित्तादहेन्नाड़ी मन्दाच कठिना मृदुः।

राजयक्ष्म रोगे।

नाड़ी नाना गतिं भुक्त्वा राज रोगे प्रवर्त्तते।

कास रोगे।

कासे सूक्ष्मा स्थिरा मन्दा

श्वास रोगे।

श्वासे तीव्र वती भवेत्।

मदात्यय रोगे।

मदात्यये च सूक्ष्मा स्यात् कठिना पूरिता जड़ा।

वात रोगे।

वाताढ्ये स्फुरत्येषा सूक्ष्मा द्रुतगति र्भवेत्।

आमवात रोगे।

आमवाते स्थिरा नाड़ी सर्व्वजे सर्व्वलक्षणा।

आनाह रोगे।

आनाहे मूत्र कृच्छ्रेच भवेन्नाड़ी गरिष्ठता।

मूत्राघात रोगे।

स्निग्धा रसवती ज्ञेया वक्रा प्रस्राव घातिनी।

मूत्राघाते मुञ्जभेदं स्फुरणैः सह गच्छति॥

प्रमेह रोगे।

प्रमेहेतु जरा सूक्ष्मा मुञ्जराख्यायते स्थिरा।

प्रमेहे ग्रन्थिरूपा सा सुतप्ता त्वाम दूषणे॥

शूल रोगे।

वातेन शूलेन मरुत् स्रवेन।

सदाति वक्राहि शिरा वहन्ति॥

ज्वाला मयी पित्त विचे ष्टितेन।

सामेन शूलेन च पुष्टि रूपा॥

मेदो रोगे।

मेदो रोगे वहेन्नाड़ी कफ प्रकोपतो यथा।

विष विद्रधि गुल्मज्ञानं।

उत्पिपासु रूपा विष रिष्टि काले।
विद्रधि गुल्मे च हि वक्र रूपा।
अत्यर्थ वातेन अधः स्फुरन्ती।
उत्तान भेदिन्य समाप्ति काले॥

गुल्म विशेष माह कश्चित्।

गुल्मेन कम्पोथ पराक्रमेण।
पारावतस्येवगतिं करोति।

व्रण नाड़ीव्रण भगन्दर रोगे।

व्रणेति कठिने देहे प्रयाति पैत्तिकं क्रमं।
भगन्दरानु रूपेण नाड़ी व्रणनिवेदने।
प्रयाति वातिकं रूपं नाड़ी पावक रूपिणी॥

ऊर्ध्वजत्रुगत रोगे।

ऊर्ध्वजत्रु विकारेच लक्षे ह्योष वलेन च।
वान्तस्य सल्याभिहतस्य जन्तो-
र्वेगावरोधाकुलितस्य भूयः।
गतिं विधत्ते धमणो गजेन्द्र-
मराल मालेव कफोल्वनेन॥

अनुक्तेष्वपि रोगेषु साम्यत्वादनुमानतः ।
युक्त्यापि दोष लिङ्गेन विज्ञेया धमनी गतिः ॥
क्वचित् प्रकरणोल्लेखात् क्वचिदौचित्य मात्रतः ।
क्वचि देशात् क्वचित् कालात् सङ्कीर्णगद निर्णयः ॥
एवं सूक्ष्मादि रूपेण नाड़ी ज्ञेया विचक्षणैः ।
स्वर्गेऽपि दुर्लभा विद्या गोपनीया प्रयत्नतः ॥

इति नाड़ी परीक्षा ।



अथ जिह्वा परीक्षा ।

जिह्वा पीता खरस्पर्शा स्फुटिता मारुताधिके ।
रक्तश्यावा भवेत् पित्ते कफात् शुक्ला घना द्रवा ॥
मिश्रलिङ्गैर्द्वन्द्वजाच सर्वैः सर्वं विभावयेत् ।
कृष्णा सकण्टका शुष्का सन्निपातात्मिकातु सा ॥

अन्यच्च ।

जिह्वा वातात् प्रसुप्ता स्फुटित-
विकसिता शाकपत्रो पमाभा ।
पित्ता द्रक्ता सदाहा भवतिच
परितः कण्टकै र्या परीता ॥
गुर्वी स्थूला सशीताश्रित बहल
कफा शाल्मली कण्टकाभा ।

सर्व्वैः स्यात् सर्व्वलिङ्गा सितरु-
धिरवहा चित्रवर्णाति रूक्षा ॥
वातेन स्फुटिता जिह्वा सुप्ता शाकदलोपमा।
रक्तिका कण्टका पित्ते श्लेष्मला सुप्तलिप्तका ॥
कफेन लिप्ताच विसर्पिणी च
स्थूला घना कण्टकसंहिता च ॥
रूक्षा विवर्णा दृढ़चेतना च।
सा सन्निपातं प्रकटीकरोति ॥
क्षया सकण्टका शुष्का सन्निपाताधिके तु सा।
म्रियते म्रियता ज्ञेया रिष्टलक्षणवर्ज्जिता ॥

इति जिह्वापरीक्षा।



अथ नेत्र परीक्षा।

सरक्तं धूम्रवर्णञ्च सरौद्रञ्च सचञ्चलम्।
अभ्यन्तरे क्रियद्दाहं वातनेत्रं तदुच्यते ॥

अन्यच्च।

अरुणं धूम्रवर्णञ्च सरौद्रञ्च सचञ्चलम्।
अभ्यन्तरे क्रियद्दाहं वातनेत्रं तदुच्यते ॥
हरितं रक्तवर्णं वा रक्तं पीतसमन्वितम्।
पित्तकोपात् सदाहं स्याद्दीप्तद्वेषि च नेत्रकम् ॥

अन्यच्च ।

हरिद्रापीतसंकाशं रक्तं वा नीलवर्णकम् ।
दोषद्वेषि ससन्तापं पित्तनेत्रं तदुच्यते ॥
सजलं बहुलं श्वेतं ज्योतिर्हीनञ्च चञ्चलम् ।
बीक्षते मन्दमन्दञ्च तच्चक्षुः कफजं भवेत् ॥

अन्यच्च ।


शुक्ले कफे क्षणे ज्ञेये रक्तपित्ते सपीतके ।
रूक्षे धूम्रे तथा वाते सुस्थपद्मदलोपमे ॥
दोषद्वयादीक्षणन्तु द्वन्द्वजं लक्षणं भवेत् ॥
श्यामं निमुग्नसङ्काशं तन्द्रामोहसमन्वितम् ।
सरौद्रं रक्तवर्णञ्च भवेच्चक्षुः त्रिदोषजम् ॥

अपरञ्च ।

नेत्रं धूम्रं सरूक्षं सजल-
मणिलजं रात्रि पीतेन तुल्यं
नीलं दीप्तासहत्वं सरुधिर
सासितं दाहयुक्तञ्च पित्ते ।
मन्दं मन्दञ्च पश्येत् सासित-
जलमतः कान्तिहीनं कफात्तु
ज्ञेयं द्वन्द्वात् द्विलिङ्गं त्रिमलज-
नयनं श्यामभुग्नं सरौद्रम् ॥
एकदृष्टि र्यदा रौद्रे उन्मीलति निमीलति ।

त्रिभिर्हिनैर्विजानीयात् स याति यममन्दिरम् ॥
कालोज्योतिर्विहीनञ्च याताभ्यन्तरलोचनः ।
मन्ददृष्टिर्विशेषेण कालप्राप्तं तमादिशेत् ॥
एकचक्षुरचैतन्यं विप्लवं स्फुरणं न च ।
दिनैकेन विजानीया तस्य मृत्तु र्न संशयः ॥

इति नेत्र परीक्षा ।



अथ मूत्रपरीक्षा ।

अथातः संप्रवक्ष्यामि मूत्रदोषन्तु रोगिणाम् ।
येन विज्ञानमात्रेण साध्यासाध्यं विनिर्दिशेत् ॥
रजन्यां पश्चिमे भागे घटिकानां चतुष्टये ।
उत्थाप्य रोगिणं वैद्यो मूत्रोत्सर्गञ्च कारयेत् ॥
आद्यन्त धारां सन्त्यज्य मध्यधारां समुद्धरेत् ।
शुद्धे कांस्ये तु मृत्पात्रे * क्षत्वा मूत्रं परीक्षयेत् ॥
गृहीतं रोगिणा मूत्रं सूर्य्यतापे तु तापयेत् ।
भास्करोदय वेलायां प्रकाशे स्थानके घृतम् ॥
लोलयित्वा पुनः सम्यक् ततो मूत्रं परीक्षयेत् ।
तृणेनादाय तैलस्य विन्दुं मूत्रे स्थिरे क्षिपेत् ॥
यदा विकाश मायाति तदा साध्यं भवेत् ध्रुवम् ।
विन्दु रूपेण मध्यस्थमसाध्यं तद्विदु र्बुधाः ॥

* शुभे काचमये पात्रे इति पाठान्तरम् ।

वातेन पाण्डुरं मूत्रं पित्तादरुणतां व्रजेत् ।
कफेन सफेणं शुक्लं मिश्रिते मिश्रितं भवेत् ॥
सन्निपाते च कृष्णं स्यादेतन्मूत्रस्य लक्षणम् ।

अन्यच्च ।

रोगार्त्तमूत्रे शुचि भाजनस्थ-
तैलं निषिक्तं किल विन्दुमात्रम् ॥
प्रसारि विस्फोटघनं निमग्नम् ।
वाते च पित्ते च कफे त्रिदोषे ॥
छाया स्याद्दारुणत्वं तदधर
बङ्गलं चानिलाद्वच्छमूर्द्धे ।
पित्तात् कौसुम्भतैलं सुब-
ङ्गतरयुतं बुद्बुदैस्तैलवर्णं ।
ज्ञेयं मूत्रं कफात्तु सितसलिल-
निभं चैवमामादजीर्णात् ।
द्वन्द्वात् द्वन्द्वं त्रिदोषोद्भवरु-
धिरता मन्दविन्दुत्वनीलम् ॥
वाते च मूत्रं विस्तार्य्यं पित्ते तैलं सबुद्बुदम् ।
श्लैष्मिके विन्दुनाक्रान्तमधोयाति त्रिदोषजे ॥

मूत्रस्य विशेषलक्षणमाह ।

पीते पित्तयुते तैलबिन्दुः सर्पगतिं भवेत् ।
पाण्डुरं दृश्यते मूत्रं वातस्याधिकतो यदा ॥

वातेन मूत्रं बज्रलं खरमूत्र समप्रभम् ।
मूत्रं श्लेष्मणि जायेत समं पल्लववारिणा ॥
तैलं पतनमात्रेण यदि विस्तार्य्य गच्छति ।
पित्तकोपं विजानीयात् यदि शोणितवर्णकम् ॥
तृणेनादाय तैलस्य विन्दुं मूत्रे क्षते सति ।
जायन्ते बुहुदा यत्र विकारः स हि पैत्तिकः ॥
कफात् पल्लवपानीयनिभं मूत्रं प्रजायते ।
तदित्यञ्च तदा तत्र तैलविन्दुः स्थिरः स्थितः ।
श्लेष्मदोषं तदा विद्यात् एकान्तेन विचक्षणः ॥
मूत्रेण सार्द्धं मिलितं तैलविन्दुः प्रजायते ।
सिद्धार्थे तैलसादृश्यं मूत्रे च पित्तमारुते ॥
तैलविन्दुर्यदा क्षिप्तः परितः परिसर्पति ॥
श्लेष्मवातोद्भवं मूत्रं सौवीरेण समं भवेत् ॥
मदिरा वर्णकं मूत्रं संयोग कफवातयोः ।
एवं भूते यदा मूत्रे तैलविन्दुर्न सर्पति ।
वातपैत्तं तदा विद्यादत्र हेला न कारयेत् ॥
मध्यभागे यदा मूत्रे दग्धोवर्णश्च जायते ।
तैलविन्दुः खरतरो वातपैत्तं तदुच्यते ॥
स्निग्धं श्यामारुणच्छायं वातान्मूत्रं प्रजायते ।
सिद्धार्थतैलसादृश्यं मूत्रं स्यादामपित्तजे ।
पाण्डुरं श्लेष्मपित्ते च पीताभासञ्च जायते ॥

तैलविन्दुस्तथा चिह्नमेश्यामबुद्बुदसंयुतम् ।
वातपित्तोद्भवं मूत्रं ज्ञातव्यञ्च भिषग्वरैः ॥
तैलविन्दुस्तथा चिह्नश्चतुर्दिक्षु विसर्पति ।
श्लेष्मवातोद्भवं मूत्रं सौवीरेण समं यथा ॥
सन्निपातेन कृष्णञ्च बभ्रुवर्णञ्च जायते ।
चिन्तितञ्च भवेत् पश्चात् ध्रुवं वै मरणं भवेत् ॥
द्रवते मज्जते विन्दुः स्रवतेच मुमूर्षताम् ।
पात्रे खण्डञ्च खड्गञ्च सरपुच्छसमन्वितम् ॥
शरञ्च लगुड़ञ्चैव तथैव त्रिचतुस्पथम् ।
विन्दुरूपं भवेद्दुष्टं न कुर्य्यात्तत् प्रतिक्रियाम् ॥
हंस पारावताकारं कलसध्वजचामरम् ।
छत्रञ्च तोमरं हर्म्यं वैवर्त्तं दृश्यते यदा ॥
आरोग्यञ्च तथा ज्ञेयं ध्रुवं कार्य्या प्रति क्रिया ॥
तैलविन्दुर्यदा मूत्रे चालनी सदृशो भवेत् ।
कुलदोषं ध्रुवं ज्ञेयं प्रेतदोषसमुद्भवम् ॥
नराकारञ्च जनयेत् किम्बा स्यान्मस्तक द्वयम् ।
भूतदोषं विजानीयाद् भूतविद्यां समाचरेत् ॥
वातात्मके ज्वरे ज्ञेयं मूत्रकं पाण्डुरं भवेत् ।
उष्णप्रोतं भवेन्मूत्रं पित्तजे तु व्यवस्थितम् ॥
कफजे तु भवेच्छ्वेतं सफेणमिति निश्चितम् ।
वातपित्तोद्भवं मूत्रं घनं श्वेतं प्रजायते ॥

तैलतुल्यं भवेन्मूत्रं पित्तश्लेष्मसमुद्भवम्।
धूम्राभं जायते चैव विवर्णं जायते ध्रुवम्॥
आरक्तं बज्र फेणाढ्यं सन्निपाते तु कृष्णकम्।
अजामूत्रसमं मूत्रं जीर्णज्वरसमुद्भवम्।
अधोबज्रलमारक्तं मूत्रमालोक्यते यदा।
वदन्ति तदतीसारलिङ्गं तल्लिङ्गवेदिनः॥
अजीर्णे च भवेन्मूत्रं श्वेतं कृष्णं तथारुणम्।
क्षयरोगोद्भवेच्छ्वतमसाध्यं तत्र निर्दिशेत्॥
जलोदरभवं मूत्रं भवेत् घृत कणोपमम्॥

इति मूत्र परीक्षा।

—※—

अथार्त्तव परीक्षा।

मिथ्याचारेण च स्त्रीणां प्रदुष्टेनार्त्तवेन च।
जायन्ते विविधा रोगा स्तस्मादृजः परीक्षयेत्॥
मासेनोपचितं काले धमनीभ्यां तदार्त्तवम्।
ईषत् कृष्णं विगन्धञ्च वायुर्योनिमुखं नयेत्॥
तद्वर्षात् द्वादशात् काले वर्त्तमानमसृक् पुनः।
जरा पक्वशरीराणां याति पञ्चाशतः क्षयम्॥

अन्यच्च।

द्वादशात् वत्सरादुर्द्ध्वं मापञ्चाशत् समाः स्त्रियः।
मासि मासि भगद्वारा प्रक्षरत्यार्त्तवं सृजेत्॥

रजः स्रवति यस्मिन् वै ऋतुकालः प्रकीर्त्तितः ।
अतस्तस्यालक्षणन्तु वैद्यिष्या कथ्यते ऽधुना ॥
पीनप्रसन्नवदनां प्रक्लिन्नात्मसुखद्विजाम् ।
नरकामां प्रियकथां स्रस्तकुच्यक्षिमूर्द्धजाम् ॥
स्फुरद्भ्रूजकुचश्रोणि नाभ्युरुज घनस्फिचम् ।
हर्षौत्सुक्य पराञ्चापि विद्याद्दतुमती मिति ॥
सुरेन्द्र गोपसंकाशं स्निग्धञ्च मधुगन्धि च ।
अपिच्छिल मशीतञ्च यद्वासो न विरज्यते ॥

अन्यच्च ।

शशासृक् प्रतिमं मत्तु यद्वा लाक्षारसोपमम् ।
तदार्त्तवं प्रशंसन्ति यद्वासो न विरञ्जयेत् ॥
मासान्निष्क्रिय दाहार्त्ति पञ्चरात्रानुबन्धि च ।
नैवाति बह्वल्पमार्त्तवं शुद्धमादिशेत् ॥

इत्यार्त्तवपरीक्षा ।

———०———

इति श्रीद्वारकानाथ भट्टाचार्य्य कविराज संगृहीतं नाड़ी विज्ञानं समाप्तम् ।

सम्पूर्णम् ।

——०✕०——

SANSKRIT VYAPITH LIBRARY 12693 TIRUPATI ★ KENDRIYA